# प्रतिदर्श
# प्रश्न-पत्र 5
व्याख्या सहित (प्रश्न–उत्तर)

## संस्कृतम्
*CBSE कक्षा 10 की परीक्षा के लिए नमूना प्रश्न-पत्र*

कालावधि : होरात्रयम् पूर्णाङ्काः 80

**निर्देशाः** 1. अस्मिन् प्रश्नपत्रे द्वौ भागौ स्तः।
2. भागः 'अ' : बहुविकल्पात्मकः प्रश्नाः (40 अङ्काः) अस्ति।
3. भागः 'आ' : वर्णनात्मकः प्रश्नाः (40 अङ्काः) अस्ति
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
5. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयः।

## भागः 'अ' : बहुविकल्पात्मकाः प्रश्नाः (40 अङ्काः)
### अनुप्रयुक्त–व्याकरणम् (25 अङ्काः)

1. अधोलिखित वाक्येषु रेखाङ्कितपदानां सन्धिपदं/संधि-विच्छेदं पदं वा चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1 × 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों के संधिपद अथवा संधि-विच्छेद पद चुनिए।) (केवल चार प्रश्न)*

*(i)* अयं बालः + चलति।
(क) बालश्चलति (ख) बालम्चलति (ग) बालस्चलति

*(ii)* वेदानां सामवेदोऽस्मि।
(क) सामवेद + अस्ति (ख) सामवेदाः + अस्मि (ग) सामवेद + आसीत्

*(iii)* प्रतापः दिग्गजः पुरुषः आसीत्।
(क) दिग्ग + गजः (ख) दिग् + गजं: (ग) दिक् + गजः

*(iv)* जगदीश्वरः सर्वत्र विराजते।
(क) जगत् + ईश्वरः (ख) जगदी + श्वरः (ग) जग् + ईश्वरः

*(v)* मनुष्य रूपेण मृगाः + चरन्ति।
(क) मृगाश्चरन्ति (ख) मृगाष्चरन्ति (ग) मृगाःचरन्ति

**2.** अधोलिखित वाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों का समास अथवा विग्रह दिए गए विकल्पों में से चुनिए।) (केवल चार प्रश्न)*

(i) हे अर्जुनः जयाजयौ समे भूत्वा युद्धं कुरू।
(क) जयश्च अजयश्च (ख) जये जेय
(ग) जया जये

(ii) समयम् अनतिक्रम्य गृहं गन्तव्यम्।
(क) यथासमयम् (ख) समयति
(ग) समयअनति

(iii) सुखं च दुखं समे कृत्वा कार्यं कुरू।
(क) सुखे दुखे (ख) सुखःदुखे
(ग) सुखदुखे

(iv) सः देवस्य आलय गच्छति।
(क) देवसलय (ख) देवालयः
(ग) देवआलय

(v) मातापितरौ पूज्यनीयाः भवन्ति।
(क) पिता माता (ख) माता च पिता च
(ग) च माता पिता

**3.** अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों के प्रकृति-प्रत्ययों को जोड़कर अथवा अलग करके उचित उत्तर विकल्पों में से चुनिए।) (केवल चार प्रश्न)*

(i) संसारे नरत्वं दुर्लभम्।
(क) नर + त्व (ख) नर + ता
(ग) नरत + व

(ii) पुत्रवान् भव इति यमराजः वरं अयच्छत्।
(क) पुत्र + वान (ख) पुत्र + शानच्
(ग) पुत्र + मतुप्

(iii) शकुन्तला बुद्धिमती आसीत्।
(क) बुद्धि + मतुप् (ख) बुद्धि + मत
(ग) बुद्धि + शानच्

(iv) सीता चतुर + टाप् बालिका अस्ति।
(क) चतुरा (ख) चतुर
(ग) चतुरतरा

(v) अस्माकं जीवने अलस्य महत् + त्व वर्तते।
(क) महत्त्वं (ख) महानता
(ग) महतात्वं

**4.** वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। *(केवलं प्रश्नत्रयम्)* (1× 3 = 3 अङ्काः)

*(वाच्य के नियमानुसार उचित विकल्प चुनिए।) (केवल तीन प्रश्न)*

(i) लता भवति सम्यक् ..........। (कृ)
(क) करोति (ख) कुरुतः
(ग) कुर्वन्ति

(ii) सीता-लते ......... कथा लिख्यते। (तत्)
(क) सः (ख) तौ
(ग) ते

(iii) लता-नहीं ......... रामायणम् दृश्यते। (छात्र)
(क) छात्रेषु (ख) छात्रेण
(ग) छात्रौ

(iv) सीता-मह्यम् रामायणं .........। (रूच्)
(क) रोचति (ख) रोचते
(ग) रोचेते

**5.** प्रदत्तविकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत। *(केवलं प्रश्नचतुष्टयम्)* (1× 4 = 4 अङ्काः)

*(दिए गए विकल्पों में से उचित कालबोधक शब्द चुनिए।) (केवल चार प्रश्न)*

(i) रमा (5:00) ....... वादने उत्तिष्ठति।
(क) पञ्च (ख) सार्द्धपञ्च
(ग) पादोनपञ्च

(ii) सा (5:30) ....... वादने भ्रमणाय गच्छति।
(क) पादोनपञ्च (ख) सार्द्धपञ्च
(ग) सपादपञ्च

(iii) सा (6:00) ....... वादने स्नानं करोति।
(क) सार्द्धषड् (ख) सपादषड्
(ग) षड्

(iv) सा (6:30) ....... वादने विद्यालयं गच्छति।
(क) सार्द्धषड् (ख) सपादषड्
(ग) षड्

(v) सा 12:30 ....... वादने गृहं आगच्छति।
(क) द्वादश (ख) सार्द्धद्वादश
(ग) सपादद्वादश

**6.** वाक्यानुगुणम् उचिताव्ययपदं चिनुत। *(केवलं प्रश्नत्रयम्)* (1× 3 = 3 अङ्काः)

*(वाक्यों के अनुसार उचित अव्यय पद चुनिए।) (केवल तीनः प्रश्न)*

(i) छात्राः उद्याने ......... भ्रमन्ति।
(क) इतस्ततः (ख) अपि
(ग) अत्र

(ii) ......... अहं देवालयं गच्छामि।
(क) उच्चैः (ख) अधुनां
(ग) श्वः

(iii) अहं ……… स्वग्रामम् गमिष्यामि।
(क) अपि (ख) सहसा
(ग) श्वः

(iv) ……… विदधीत न क्रियामः।
(क) सहसा (ख) अत्र
(ग) ह्यः

**7. अधोलिखित वाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत। *(केवलं प्रश्नत्रयम्)*** (1 × 3 = 3 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पद अशुद्ध हैं। शुद्ध पद विकल्पों में से चुनिए।) (केवल तीन प्रश्न)*

(i) सः पत्रवाहकः <u>अस्मि</u>।
(क) अस्ति (ख) असि
(ग) आस्ताम्

(ii) जनेभ्यः प्रतिदिनम् <u>आगतम्</u> पत्राणि वितरति।
(क) आगते (ख) आगताम्
(ग) आगत्य

(iii) अहं <u>स्वकर्म</u> सदा निष्ठया करोमि।
(क) स्वकर्माणि (ख) स्वकर्म
(ग) स्वकर्मः

(iv) <u>ताः</u> बालकाः गृहस्य बहिः क्रीडन्ति।
(क) ते (ख) तानि
(ग) सा

## पठित-अवबोधनम् (15 अङ्काः)

**8. रेखांङ्कितपदानां आधृत्य प्रश्नवाचकं पदं चिनुत। *(केवलं प्रश्नपञ्चमम्)*** (1× 5 = 5 अङ्काः)

*(रेखांकित पदों के आधार पर प्रश्नवाचक पद चुनिए।) (केवल पाँच प्रश्न)*

(i) मूषकः <u>सिंहस्य</u> बलं न जानाति।
(क) का (ख) कस्य
(ग) कः

(ii) भारं वहने गर्दभः <u>वीरः</u> अस्ति।
(क) कस्य (ख) के
(ग) कीदृशः

(iii) आलस्य <u>शरीरस्य</u> महान् रिपुः अस्ति।
(क) कुत्र (ख) कदा
(ग) कस्य

(iv) <u>वायसः</u> वसन्तस्य गुणं न जानाति।
(क) कः (ख) कौ
(ग) के

(v) उदयसमये सविता <u>रक्तः</u> भवति।
(क) केषु (ख) कीदृशः
(ग) कं

(vi) विचित्रे संसारे <u>सर्वम्</u> निरर्थकम् अस्ति।
(क) कम् (ख) काः
(ग) का

**9. अधोलिखित वाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत। *(केवलं प्रश्नचतुष्टयम्)*** (1× 4 = 4 अङ्काः)

*(निम्नलिखित वाक्यों में रेखांकित पदों के प्रसंगानुकूल उचित अर्थ चुनिए।) (केवल चार प्रश्न)*

(i) मार्गे चलनमपि <u>दुर्वहं</u> वर्तते।
(क) दुष्टम् (ख) कठिनम्
(ग) सरलं

(ii) अस्मिन् जलाशये <u>निर्मलं</u> जलं नास्ति।
(क) समलम् (ख) स्वच्छम्
(ग) मलिनम्

(iii) <u>जगति</u> सर्वत्र प्रदूषणं जातम्।
(क) संसारे (ख) नगरे
(ग) ग्रामे

(iv) <u>वने</u> अनेके पशवः निवसन्ति।
(क) नगरे (ख) गृहे
(ग) कान्तारे

(v) <u>काकः</u> अपि इति श्रुत्वा वदति।
(क) पिकः (ख) वायसः
(ग) मयूरः

**10. भाषिककार्यसम्बद्धानां प्रश्नानाम् समुचितम् उत्तरं विकल्पेभ्यः चिनुत। *(केवलं प्रश्नषट्कम्)*** (1× 6 = 6 अङ्काः)

*(भाषिक कार्य से सम्बन्धित प्रश्नों के उचित उत्तर विकल्पों में से चुनिए।) (केवल छः प्रश्न)*

(i) 'विलोक्य' इति पदस्य पर्यायपदं किम्?
(क) दृष्ट्वा (ख) कश्चित्
(ग) रोदिषि

(ii) 'क्रुद्धः कृषीवलः' अनयोः पदयोः विशेषणपदं किम्?
(क) कुद्धः (ख) कृषीवलः
(ग) सुराधिपः

(iii) 'क्षेत्रे पपात्' अत्र क्रियापदं किम्?
(क) ऋषभः (ख) पपात्
(ग) किमेव

(iv) 'काकः' इति पदस्य पर्यायपदं अत्र किम्?
(क) पिकः (ख) सिंहः
(ग) वायसः

(v) 'मूषिका' इति पदस्य विलोमपदं किम्?
(क) मूषिका (ख) करी
(ग) मूषकः

(vi) 'बली बलं वेत्ति' अत्र क्रियापदं किम्?
(क) बली (ख) बलं
(ग) वेत्ति

*(vii)* 'पुष्टम्' इत्यस्य विलोमपदं किम्?
(क) दुर्बलम् (ख) सुबलं
(ग) कृषकं

*(viii)* 'दुर्बलम् वृषभम्' अनयोः पदयोः विशेष्यपदं किम्?
(क) दुर्बलम् (ख) वृषभम्
(ग) न कोऽपि

# भागः 'आ' : वर्णनात्मकाः प्रश्नाः (40 अङ्काः)

## अपठित-अवबोधनम् (10 अङ्काः)

**11.** अधोलिखित गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत।

*(निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

जीवने सफलतायाः आधारः पुरुषार्थः एव! अस्य अभावेन नरः सुखसमृद्धिम् आप्तुम् असमर्थः भवति यशः च न प्राप्नोति! यदा यदा नरः पुरुषार्थम् अचिनोत तदा तदा तेन सफलता प्राप्ता! पुरुषार्थिनः एवम् संसारे विलक्षणप्रतिभाम् अर्जितवन्तः! अनेन एवम् ऐवरेस्टशिखरम् अजयत् अंतरिक्षं च अगच्छत्। नरः! देशसेवया समाजसेवया शिक्षाप्रसारेण च पुरुषार्थिभिः उल्लेखनीयानि कार्याणि कृतानि! अस्माकम् इतिहासे तेषां गौरवगानं विद्यते! आपत्काले येषां मनांसि विचलितानि न भवन्ति। ते एव जीवने सफलतां प्राप्नुवन्ति! पुरुषार्थिनाम् कृते तु पुरुषार्थः एव उपासना अस्ति! यः जनःस्वजीवने सफलतां प्राप्तुम् इच्छति सः पुरुषार्थः अवश्यमेवं कुर्यात्। पुरुषार्थस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते।

I. एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* (1×2 = 2 अङ्काः)
*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*
*(i)* जीवने सफलतायाः आधारः किम्?
*(ii)* केषां कृते पुरुषार्थः उपासना अस्ति?
*(iii)* के संसारे विलक्षण प्रतिभाम् अर्जितवन्तः?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* (2×2=4 अङ्काः)
*(पूर्णवाक्य में उत्तर लिखिए।) (केवल दो प्रश्न)*
*(i)* येषां मनांसि आपत्काले विचलितानि न भवन्ति ते किं कुर्वन्ति?
*(ii)* जीवने सफलतायाः आधारः कः?
*(iii)* कस्य अभावे जनः सफलतां प्राप्तं न कर्तुं शक्यते?

III. अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। *(द्वित्रिशब्दात्मक-वाक्यम्)* (1 अङ्क)
*(इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए।) (दो-तीन शब्द का वाक्य)*

IV. यथानिर्देशम् उत्तरत। *(केवलं प्रश्नत्रयम्)* (1 × 3 = 3 अङ्काः)
*(निर्देशानुसार उत्तर दीजिए।) (केवल तीन प्रश्न)*
*(i)* 'प्राप्नुवन्ति' इति क्रियापदस्य कर्तृपदं किम्?
(क) पुरुथार्थी (ख) पुरुषार्थिनः
(ग) ते
*(ii)* 'अपयशः' इति पदस्य विपर्यपदं गद्यांशे किम् प्रयुक्तम्?
(क) विलक्षणम् (ख) कार्यम्
(ग) यशः
*(iii)* 'मानवः' इति पदस्य पर्यायपदं गद्यांशे किं प्रयुक्तम्?
(क) सुखः (ख) नरः
(ग) करः
*(iv)* 'उल्लेखनीयानि' इति पदस्य विशेष्यपदं गद्यांशे किं प्रयुक्तम्?
(क) कृतानि (ख) कार्याणि
(ग) पुरुषार्थः

## रचनात्मक-कार्यम् (15 अङ्काः)

**12.** स्वं कौशलं मत्वा राजकीय उच्च माध्यमिक विद्यालय उदयपुरस्य प्रधानाचार्याय स्थानान्तरण प्रमाण-पत्र प्राप्त्यर्थम् अधोलिखित प्रार्थनापत्रं मञ्जूषात् उचित पदैः चित्वा पूरयत। (½ × 10 = 5 अङ्काः)

*(स्वयं को कौशल मानकर राजकीय उच्च माध्यमिक विद्यालय उदयपुर के प्रधानाचार्य को स्थानान्तरण प्रमाण-पत्र प्राप्त करने के लिए निम्नलिखित प्रार्थना-पत्र को मञ्जूषा से उचित शब्द चुनकर पूरा कीजिए।)*

सेवायाम्
श्रीमन्तः प्रधानाध्यापक महोदयाः,

(i)..........

विषयः-स्थानान्तरण-प्रमाण-पत्र-प्राप्त्यर्थम्

महोदयाः,

सविनयं (ii).......... यद् मम पूज्यपितुः (iii).......... बीकानेरनगरे सञ्जातम्। अस्मात्कारणात् वयं सर्वेऽपि पारिवारिकजनाः तत्रैव (iv).......... । ममापि तैः सह तत्र (v).......... निश्चितमेव। अतः सम्प्रति अहमत्र (vi).......... सर्वथा असमर्थोऽस्मि अतः (vii).......... अस्ति यन्मह्यं स्थानान्तरण प्रमाणपत्रं (viii).......... अनुग्रहीष्यन्ति श्रीमन्तः। मम (ix).......... स्थानान्तरणस्य राज्यादेशप्रतिलिपिः भवतामवलोकनार्थं संलग्ना अस्ति।

प्रार्थी

(x)..........

कक्षा-दशमी

[**मञ्जूषा** पितुः, गमिष्यामः उदयपुरम्, कौशलः, प्रदाय, स्थानान्तरणं, पठितुं, गमनं, निवेदनमस्ति, प्रार्थना।

**13.** अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (1 × 5 = 5 अङ्काः)

*(नीचे दिए गए चित्र को देखकर मञ्जूषा में दिए गए शब्दों की सहायता से पाँच वाक्य संस्कृत में लिखिए।)*




[**मञ्जूषा** विद्यालयस्य, अयं, प्रवेशद्वारे, वृक्षाः, छात्राः, विद्यायाः मन्दिरम्, विद्यालयः, अत्र, पठनाय, अपि, आगच्छन्ति, अस्ति, सन्ति, भवति, क्षेत्रम्, आदर्शविद्यालयः चित्रे, बहवः, एकः, दृश्यन्ते, विद्यालयः।

***अथवा***

'जन्तुशालाः' इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चवाक्यानि संस्कृतेन लिखत। (1 × 5 = 5 अङ्काः)

*('जन्तुशाला' इस विषय को आधार मानकर मञ्जूषा में दिए गए शब्दों की सहायता से पाँच वाक्य संस्कृत में लिखिए।)*

[**मञ्जूषा** सिंहः, तत्र, स्थिताः, अस्मान्, जन्तुशालायाः, वयं, च, पिंजरे, दृश्यते, न कर्त्तव्यम्, एकस्मिन्, कोणे, स्म, बद्धौ, अपश्याम् तीव्रं, जनाः, विचित्रं, चित्रकः, धावति, मृगद्वयं, अगच्छाम, दूषितं, पश्यन्ति, वातावरणं, अद्य, एकः।

**14.** अधोलिखित वाक्यानाम् संस्कृतभाषायां अनूद्य लिखत। *(केवलं पञ्चवाक्यम्)* (1× 5 = 5 अङ्काः)

*(निम्नलिखित वाक्यों का संस्कृत भाषा में अनुवाद लिखिए।) (केवल पाँच वाक्य)*

*(i)* लता पत्र लिखती है।
Lata writes a letter.

*(ii)* वह जयपुर जाएगा।
He will go to Jaipur.

*(iii)* तुम कब खेलते हो?
When do you play?

(iv) किसान खेत में जाता है।
The farmer goes to field.

(v) बालक गेंद से खेलता है।
The boy plays with ball.

(vi) पहले दुष्यन्त नामक राजा हुआ।
Earlier there was a King named Dushyant.

(vii) दुष्यन्त की पत्नी शकुन्तला थी।
The wife of Dushyant was Shakuntala.

## पठित-अवबोधनम् (15 अङ्काः)

**15.** अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (3 अङ्काः)

*(निम्नलिखित गद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत्। तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत्। अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत। सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात। क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्। तथापि वृषः नोत्थितः। भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्। सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत्।—"अयि शुभे! किमेवं रोदिषि? उच्चताम्" इति। सा च

I. एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($\frac{1}{2} \times 2 = 1$ अङ्कः)

*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) कृषकः बलीवर्दाभ्यां किं कुर्वन्नासीत्?

(ii) सः ऋषभः हलमूढ्वा कुत्र पपात?

(iii) बलीवर्दयोः एकः शरीरेण कीदृशः आसीत्?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($1 \times 2 = 2$ अङ्काः)

*(पूर्णवाक्य में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) सुराधिपः सुरभेः किं अपृच्छत्?

(ii) क्रुद्धः कृषीवलः किं अकरोत्?

(iii) कीदृशः ऋषभः क्षेत्रे पपात?

**16.** अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (3 अङ्काः)

*(निम्नलिखित पद्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

गुणी गुणं वेत्ति न वेत्ति निर्गुणो, बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसंतस्य गुणं न वायसः, करी च सिंहस्य बलं न मूषकः।।

I. एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($\frac{1}{2} \times 2 = 1$ अङ्कः)

*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) गुणी कं वेत्ति?

(ii) बली कं वेत्ति?

(iii) वायसः कस्य गुणं न जानाति?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($1 \times 2 = 2$ अङ्काः)

*(पूर्णवाक्य में उत्तर लिखिए।)(केवल दो प्रश्न)*

(i) पिकः कस्य गुणं जानाति?

(ii) मूषकः कस्य बलं न जानाति?

(iii) करी कस्य बलं जानाति?

**17.** अधोलिखितानां नाट्यांशं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि संस्कृतेन लिखत। (3 अङ्काः)

*(निम्नलिखित नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में लिखिए।)*

**काकः** अरे! अरे! किं जल्पसि? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनाना कृते

**उदाहरणस्वरूपा** "अनृतं वदसि चेत् काकः दशेत्"—इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम्। अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

**पिकः** अलम् अलम् अतिविकत्थनेन किं विस्मर्यते यत्—

**काकः** कृष्णः पिकः कृष्णः को भेदः पिककाकयोः।
वसंतसमये प्राप्ते काकः काकः पिकः पिकः।।

**काकः** रे परभृत्! अहं यदि तव संततिं न पालयामि तर्हि कुत्र स्युः पिकाः?
अतः अहम् एव करुणापरः पक्षिसम्राट् काकः।

I एकपदेन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($\frac{1}{2} \times 2 = 1$ अङ्कः)

*(एक पद में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) 'अहं कृष्णवर्णः' इति कः कथयति?

(ii) 'त्वं किं गौराङ्गः' इति काकः कस्मै कथयति?

(iii) पिकस्य संतति कः पालयति?

II. पूर्णवाक्येन उत्तरं लिखत। *(केवलं प्रश्नद्वयम्)* ($1 \times 2 = 2$ अङ्काः)

*(पूर्णवाक्य में उत्तर लिखिए।) (केवल दो प्रश्न)*

(i) काकः कदा दशेत्?

(ii) काकः कीदृशः पक्षिसम्राट् कः?

(iii) कीदृशः विद्यार्थी आदर्शच्छात्रः मन्यते?

**18.** मञ्जूषायाः साहाय्येन श्लोकस्य अन्वये रिक्तस्थानानि पूरियत्वा पुनः लिखत। ($\frac{1}{2} \times 4 = 2$ अङ्काः)

*(मञ्जूषा की सहायता से श्लोक के अन्वय में रिक्तस्थानों की पूर्ति करके पुनः लिखिए।)*

सुलभेष्वर्थलाभेषु, परसंवेदने जने।
क इदं दुष्करं कुर्यादिदानीं शिविना विना।।

**अन्वयः** परस्य (*i*) ......... अर्थलाभेषु (*ii*) ........., इदं दुष्करं कर्म जने लोके (*iii*) ......... विना कः (*iv*) .........।

**मञ्जूषा** कुर्यात्, शिविना, सुलभेषु, संवेदने।

***अथवा***

अधोलिखित श्लोकस्य भावार्थे मञ्जूषाया! उचित पदैः पूरयत

*(निम्नलिखित श्लोक का भावार्थ मञ्जूषा के उचित पदों से पूरा कीजिए।)*

क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय।
यथास्थितः काष्ठगतो हि वह्निः, स एव वह्निर्दहते शरीरम्।।

**भावार्थः** मनुष्याणां (*i*) ......... प्रथमः शत्रुः शरीरे। स्थितः (*ii*) ......... एवास्ति। यथा काष्ठगतः (*iii*) ......... काष्ठम् एव दहते, तथैव शरीरस्थः क्रोधः (*iv*) ......... ।

**मञ्जूषा** शरीरम्, अग्निः, क्रोधः, शरीरविनाशाय।

**19.** अधोलिखितं कथांशं समुचितक्रमेण लिखत।

*(निम्नलिखित कथांश को उचित क्रम में लिखिए।)* ($\frac{1}{2} \times 8 = 4$ अङ्काः)

(*i*) भयाकुलं व्याघ्रं दृष्ट्वा धूर्तः श्रृगालः हसति।
(*ii*) बुद्धिमती जम्बुकमाक्षियन्त्यङ्गुला तर्जयन्त्युवाच।
(*iii*) जम्बुक! त्वमपि किञ्चित् गूढ़प्रदेशं गच्छ।
(*iv*) एकदा बुद्धिमती स्त्री पुत्रद्वयेन सह पितुर्गृहं प्रति गता।
(*v*) रे धूर्त! त्वया महयं पुरा व्याघ्रत्रयं दत्तम्, अद्यैकमानीय कथंयासि?
(*vi*) मया सात्मपुत्रावेकैकशो मामन्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।
(*vii*) मार्गे सा निजबुद्ध्या व्याघ्रस्य भयाद् विमुक्ता।
(*viii*) व्याघ्रः निजगले श्रृगालं बद्ध्वा पुनः काननं ययौ।